This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2294 विषय धर्मशास्त्र

नाव मुहूर्तदीपक (मुद्रित)

लेखक / लिपीकार श्रीमहादेव भैटर

पृठ 22 काळ इ.स. 1887 पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ॐ हर्षिद्वे तर्फे 5/9/2013

M-2294

अथ महूर्तदीपक सटीक प्रा.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः ग्रंथकर्ताकथयति अहंमुहूर्तदीपकं कुर्वेमुहूर्तान् जातकर्मादि संस्कार समयान्दी
पयतीति किंकृत्वा एकरदंदेवंगणेशंचपरं शारदांसरस्वतींगुरुंचप्रणम्य किंलक्षणंमुहूर्तदीपकं बाला
नांअज्ञानमेवतमः तदपहंतीतिबालाज्ञानतमोपहः तम् १ नंदेति प्रतिपदभिमुखास्तिथयोनंदाभद्रा
जयाख्याश्चपरंरिक्तिकाः पूर्णाः स्युः प्रतिपत् अभिमुखामुख्यायासांताः अत्रबहुवचनंतिस्रोनंदाख्याः

प्रणम्यैकरदंदेवंशारदांगुरुमेवच ॥ मुहूर्तदीपकंकुर्वेबालाज्ञानतमोपहं ॥ १ ॥
नंदाभद्राजयाख्याः प्रतिपदभिमुखारिक्तिकाः स्युश्चपूर्णाः संज्ञातुल्यार्थकृ
त्या भृगुविदवनिजार्कीज्यवारेषुसिद्धाःस्त्रीसेवाक्षौरतैलामिषमशुभममाभूतष
ष्ठयष्टमी षुस्नानंनाशाक्षिविश्वैः परिमिततिथिषुत्रिंशदंकाद्रितुल्ये ॥ २ ॥

तिस्रोभद्राख्या स्तिस्रोजयाख्याः तिस्रोरिक्तिकास्तिस्रः पूर्णाः एताःसंज्ञातुल्यार्थकृत्याः संज्ञातुल्यं अर्थ
कृत्यंकार्यनिष्पतिर्यासुताः एताएवनंदाद्याः भृगुविदवनिजार्कीज्यवारेषुचेद्भवंतितदासिद्धाः स्युः नंदाशु
क्रेबुधेभद्राजयाभौमेशनेर्दिने रिक्तापूर्णागुरौवारेसिद्धाः स्यु स्तिथयःक्रमात् अमाभूत षष्ठ्यष्टमीषुकमेण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्रीसेवाक्षौरेतेलामिषं अशुभंवर्ज्यमेव यदुक्तं षष्ठीषुतैलंपलमष्टमीषुक्षौराक्रियांचैवचतुर्दशीषु स्त्रीसेवनं
नष्टकलासुपुंसामायुःक्षयार्थमनुयोवदंति १ आशाक्षिविश्वैः आशादश १० अक्षिणीद्वेरविश्वेत्रयो
दशएतैः परिमितातिथिषुदशमीद्वितीयात्रयोदशीषुत्रिंशत् ३० अंकाः ९ अद्रयः ७ तैः तुल्येतिथौदर्शन
वमीसप्तमीषुमलस्नानंनकार्यंतदुक्तंस्नातुर्जनस्यदशमीतनयंत्रयोदशार्थंनिहंत्युभयमेवमपिद्वितीयासप्तम्य
निंदुनवमीषुचसंपादिच्छुः स्नायात्कदाचिदपिनामलकैर्मनुष्यः २ दग्धाइतिविभूताश्चतुर्दशीरहिताःयु

दग्धायुग्माविभूतागतवतितरणौचापमीनेघटोक्ष्णेकर्काजेस्त्रीनृयुग्मेमृगपाति
सविषेतौलिनक्रेक्रमेण ॥

न्मतिथयःद्वितीयाचतुर्थी षष्ठ्यष्टमी दशमीद्वादश्यःक्रमेणदग्धाःस्युःकिंसतितरणौसूर्येवक्ष्यमाणराशियु
ग्मेगतवतिसति तद्यथा चापमीने तरणौद्वितीयादग्धा चापमीनमितिसमाहारद्वंद्वःघटोक्ष्णेकुंभवृषयोस्तर
णौगतेचतुर्थीदग्धा अत्रेतरद्वंद्वःकर्काजेकर्किणिमेषेतरणौसतिषष्ठीदग्धा स्त्रीनृयुग्मे कन्यामिथुनयोरष्टमी
दग्धा मृगपतिसविषे सिंहनृश्चिकेरवौदशमीदग्धा तौलिनक्रेतुलामकरेद्वादशीदग्धानिषिद्धा तदुक्तंमी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेचापिद्वितीयाच चतुर्थीवृषकुंभयोः मेषकर्कटयोः षष्ठीकन्यायांमिथुनेऽष्टमी दशमेवृश्चिकेसिंहेद्वाद
शीघटनक्रयोःएताः स्युस्तिथयोदग्धाद्वौद्वौराशिस्थितेरवौचपरंनंदाद्यारिक्तिकांताश्चतस्रस्तिथयः त्रिवा
रंत्रिरानृत्त्याअजभमुखतोराशीनांस्युः प्राक्नंदामेषस्यभद्रानृषस्यजयामिथुनस्यरिक्तिकाकर्कस्यचतुर्णां
राशीनांपूर्णाप्रहरद्वयंद्वयंमेषादीनांपंचम्याः एवंसिंहादीनां चतुर्णांषष्ठ्यादयस्तथादशमीसिंहादीनांचतु

नंदाद्यारिक्तिकांतास्त्रिरजप्रमुखतः स्युश्चतुर्णांचपूर्णानेष्टाक्रूरराशेःप्रतिपदि
चकूहौदंतकाष्ठंनषष्ठ्याम् ३ ॥

र्णांपुनरेकादश्याद्याश्चतस्रोधनुरादिचतुर्णांराशीनांतिथयः पुनः पूर्णापूर्णमाशीदर्शौधनुरादीनांभवतः
एवंसपादातिथेरेकोराशिराश्याधिकसंज्ञेयंसक्रूरराशेः क्रूरेणरविकुजमंदराहूणामेकतमेनसहितोयोराशि
स्तत्संबंधि नीयातिथिः सानेष्टाशुभ कार्येचपरंप्रतिपदिकुहौदर्शेषष्ठ्यांदंतकार्यंनतथाचोक्तं नष्टेंदुष
ष्ठीप्रतिपत्सुधीमान् नजानुदंतोत्कषणं विदध्यात् कुर्वन्नवाप्नोतितदासनूनंलक्ष्मीकुलज्ञातिजयोपघा
तम् ॥ ३ ॥ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भेशाइतिएतेभेशाभानांनक्षत्राणांईशाज्ञेयाःतेकेदस्रौअश्विनीकुमारौअश्विन्याअधिपतीअंतकोयमोभर
ण्याःअग्निःकृत्तिकायाःद्रुहिणोब्रह्मारोहिण्याःशशीमृगशीर्षस्याशिव आर्द्रायाःअत्रेतरेतरहंहःदेवसूःदेवान्
सूतेसादेवसूरिति अदितिःपुनर्वसोःईज्योगुरुःपुष्यस्यसर्पाआश्लेषायाःपित्राख्याःपितरोमघायाःभगःसू
र्यविशेषःपूर्वाफाल्गुन्याःअर्यमाउत्तराफाल्गुन्याःरविर्हस्तस्यदिविषत्सूत्रकारःदिविषदोदेवाःतेषांसूत्रका

भेशादस्त्रांतकाग्निद्रुहिणशशिशिवादेवसूरीज्यसर्पाः पित्राख्याः स्युर्भगोथा
र्यमरविदिविषत्सूत्रकारानिलाश्च शक्राग्नीमित्रइंद्रोनिर्ऋतितनुभवोवारीवि
श्वेविधाताश्रीशोवस्वाख्ययादः पतिरजदहिर्बुध्न्यपुषाभिधानाः ॥ ४ ॥

रोवार्धुषिवविश्वकर्माचित्रायाः अनिलोवायुः स्वातेः शक्राग्नीशक्रश्चअग्निश्चशक्राग्नीद्वावपिविशाखायाः
मित्रःसुर्यभेदअनुराधायाः इंद्रोज्येष्ठायाः निर्ऋतितनुभवोराक्षसाः मुलस्यवारिजलंपुर्वाषाढायाः विश्वदे
वाउत्तराषाढायाः विधाताअभिजितः श्रीशोविष्णुः श्रवणस्यवस्वाख्यावसवोधनिष्ठायाः यादः पतिर्वरु
णःशततारकायाः अजपत् अजैकपादमहादेवभेदः पूर्वाभाद्रपदायाः अहिर्बुध्न्यउत्तराभाद्रपदायाःपुषाः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुर्यभेदोरेवत्वाइत्यष्टाविंशतिदेवतास्तन्नाम्नाभनांनामानिकल्प्यानि ४स्वातिरिति स्वातिःआदित्यंआदि
तेरिदमादित्यंपुनर्वसुः हरित्रयंहरिशब्देनहरिभंश्रवणोग्राह्यः इदंसांकोतिकंशास्त्रंनामैकदेशग्रहणेनामग्रह
णंश्रवणत्रयंश्रवणधनिष्ठाशततारापुतत्नक्षत्रपंचकंचरचलसंज्ञंभवतिधात्रंरोहिणीउत्तरास्तिस्रएतीः ध्रुध्रु
वाःस्थिराश्चभवंति पितृमघापूर्विकास्तिस्रः अंतकंभरणीएतत्पंचकंक्रूरोग्रसंज्ञंभवाति अथद्वीशांविशाखा

स्वात्यादित्यहरित्रयंचरचलंधात्रोत्तराध्रुस्थिराः क्रूरोग्रंपितृपूर्वकांतकमथद्वी
शानलेमिश्रके हस्तेज्याश्वभिजिल्लघुर्मृगाशिराश्चित्रांत्यमत्रमृदुज्येष्ठार्द्रोरगमू
लमेतदुदितंतीक्ष्णंशशीनारतः ५ ॥

अनलंकात्तिका एतेमिश्रसंज्ञेहस्तः इज्यंपुष्पः अश्वि अश्विनी अभिजित् अयंगणोलघुर्भवाति मृगाशिरः
चित्राअंत्यंरेवती मैत्रमनुराधाएतत् चतुष्कंमृदु ज्येष्ठाआर्द्राउरगमाश्लेषामूलंएतत्तीक्ष्णंउदितंकाथि
तंनामसप्तकं चरचलादिएतत् शशीचंद्रः इनः सूर्यः आरोभौमः ततोज्ञेयंएतदुक्तंभवती चंद्रश्चल
श्चरःरविःस्थिरोध्रुवःभौमःक्रूरोग्रःबुधोमिश्रः गुरुर्लघुः शुक्रोमृदुः शनिस्तीक्ष्णः एवंनक्षत्रनामानितच्चोक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रविःस्थिरःशीतकरश्चरश्चमहीजउग्रःशशिजश्चमिश्रःलघुः सुरेज्योभृगुजोमृदुश्चतीक्ष्णोर्कसूनुः कथितोमु
नैद्रैः ५ रवितोरविवारात्क्रमेणसप्तवारेषु एतानिभानित्यजेत्शुभकार्येष्वितिशेषःतत्ररविवारेद्वीशात्त्रीणि
विशाखायास्त्रीणिविशाखा अनुराधाज्येष्ठाइतित्रीणिभानित्यजेत् सोमवारे उदकोडुतःपुर्वाषाढायास्त्री
णिपूर्वाषाढोत्तराषाढाऽभिजित्भौमवारे वसुभतो धनिष्ठायास्त्रीणिधनिष्ठाशताभिषक् पूर्वाभाद्रपदास्त्य
जेत् बुधवारेपौष्णाद्रेवत्यास्त्रीणिरेवत्यश्विनीभरणीस्त्यजेत् गुरुवारेकभाद्रोहिण्यास्त्री णिरोहिणीमृगार्द्रा

द्वीशात्त्रीण्युदकोडुतोवसुभतः पौष्तात्कभाज्जीवभादार्यम्णाद्रावितस्त्यजेद्यम
मघेत्वाष्ट्राद्विदैवेतथा ॥

स्त्यजेत् शुक्रवारेजी वभात् पुष्यात्त्रीणिपुष्याश्लेषामघास्त्यजेत् शनिवारे आर्यम्णात् ऊत्तराफाल्गुन्या
स्त्रीणिउत्तराफाल्गुनीहस्तचित्रास्त्यजेत्एतेनउक्तातमृत्युकाणयोगाउक्ताःतथातथैवरावितोद्वेद्वेभेत्यजेत्ते
केयममघेभरणीमघेरविवारेत्यजेत्सोमवारेत्वाष्ट्रद्विदैवैचित्राविशाखेभौमवासरेवैश्वार्द्रेउत्तराषाढाऽर्द्रेबुध
वारेवसुमूलकेधानिष्ठामूलेत्यजेत् गुरुवारेऽनलशतेकृत्तिकाशततारकेत्यजेत् भृगुवारेज्येष्ठाकभेज्येष्ठारो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिण्यौ शनिवारे अंबुद्वयं पूर्वाषाढाद्वयं पूर्वाषाढोत्तराषाढेत्यज्ये अत्रत्यज्यप्रकरणाद्यस्मिन् वारेयत्
त्यज्यंतदैवमुक्तं तत्रशनिवारेकेचनरेवतींहस्तंच्जन्मभंयमघंटयोगाख्यावदंति तन्निर्मूलंयतः हस्तेमृत्यु
योगस्यप्राक्कथनात् प्राचीनाचार्यत्रिविकमेणालिखितमस्तिअतः त्रिविक्रममतेशनैत्यातांशनैर्द्वेवज्जया
षाढेद्वादशाभात्रयंतथातेनाषाढाद्वयंनिषिद्धंअथसूर्येरविवारेप्रथमासप्तमीतिथि ७ अनयोर्योगेष्टौभवंतिए

वैश्वार्द्रेवसुमूलकेऽनलशतेज्येष्ठाकभेंबुद्वयंसूर्येष्टौ
विदिपंचवारतिथिजान्विश्वान्समस्तेष्विति ६ ॥

वंविदिबुधेतूर्येवारे ४ प्रतिपत्तिथीअनयोर्योगेपंचत्याज्याः एवंसमस्तेषुरव्यादिवारेषुतिथिवारजान्त्रयो
दशत्यजेत्एवंद्वादशीरवीवारे एकादशीं सोमवारे दशमींभौमवासरे नवमींबुधवासरे अष्टमींगुरौ सप्त
मीशुक्रे षष्ठीशनिवारे त्यजेदिति संवर्त्तककचावुक्तौइत्युत्पातमृत्युकाणजन्मभयमघंटसंवर्त्तककच
योगाः ॥ ५ ॥ श्री सीतारामचंद्राभ्यांनमः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रात्रेरर्धरात्रीणामर्द्धद्युयुतं दिनमानेनयुतंकार्यंपश्चाविराष्ट्तिथियुक्विगतानिदेशान्तरपलान्यिभ्यस्तास्ति
थयःपंचदशघटिकेत्यर्थःअत्रराष्ट्रशब्देनदेशान्तर पलानिग्रह्यन्तेः१५युक्युतंकार्यंतदावारप्रवृत्तिःस्यात्ष
ष्ठितोन्यनेरात्रिशेषेषष्टितोधिकेसूर्योदयादर्धंततोवारप्रवृते सकाशात् होराभवतिकिंलक्षणासार्धघाटिद्वया
सार्द्धघटिद्वयंयस्याःसासादिनपतेर्दिनवाराद्वहाणांहोराभवति तद्यथा प्रथमादिनविभोः द्वितीयातस्मात्षष्ठ
स्यततोऽपिषष्ठस्यएवंचतुर्विंशतिहोराअहोरात्रेस्युःतथाचश्रीपतिःवारप्रवृत्तेघाटिकाद्विनिघ्नाः कालाख्यहो

रात्र्यर्धद्युयुतंसपादमनुयुक् वारप्रवृत्तिस्ततोहोरासार्धघाटिद्वयादिनपतेःषष्ठ
स्यषष्ठस्यसा ॥

रापतयःशराप्ताः दिनाधिपाद्यारविशुक्रसौम्याःशशांकसौरीज्यकुजाःक्रमेणेतिदिनाधिपाद्गणनीयाः तासां
मध्येचंद्रबुधजीवशुक्राणांहोराः श्रेष्ठाःरविकुजमंदानांहोराःसामान्याःअतोमध्याःयस्यग्रहस्ययद्वारेकिंचि
त्कर्मप्रकीर्तितंतत्तस्यकालहोरायांसर्वमेवविधियतेइतिश्रीइत्युक्तिःअथरवेः सकाशात् यामार्द्धंत्यजेत् क
तितमं तुर्याद्रिद्विशराष्टरामरसकंतुर्यं चतुर्थरविवारे सोमवारेऽद्रिसप्तमितंभौमेद्वि २ बुधेशरमितं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमंजीवेअष्टमितंशुक्रवारेराममितंत्रितयंशानिवारेरसमितंषष्ठंइयंवारवेलानिषिद्धापुनःरवेःसकाशात्ति
थ्यंशोमुहूर्तःदिनमानस्यपंचदशमुहूर्तःसकुलिकोभवतिघस्रेदिवसेकतिमितःमनूल्क्रमसमःमनुतश्चतुर्दश
तःउल्क्रमेणव्यस्यतयासमःसमसंख्यःसकुलिकोज्ञेयःरविवारेचतुर्दशोमुहूर्तःसोमवारेद्वादशः भौमवारेदश
मःबुधवारेषष्टमःगुरुवारेषष्ठःशुक्रवारेतुर्यःशानिवारेद्वितीयःनिशिरात्रौनिरेकःरविरात्रौत्रयोदशःसोमरात्रौचै

तुर्याद्रिद्विशराष्टरामरसकंयामार्द्धमुज्ज्ञेद्रवेस्तिथ्यंशः कुलिकोमनूल्क्रमसमो
घस्रेनिरेकोनिशि ॥ ७ ॥

कादशःभौमरात्रौनवमःबुधरात्रौसप्तमःगुरुरात्रौपंचमःशुक्ररात्रौतृतीयःशानिरात्रौप्रथमःएतेकुलिकाःशुभ
कार्येनिषिद्धाःतथाचोक्तंमन्वर्कदिग्वस्वृतुवेदपक्षैरर्कान्मुहूर्तैःकुलिकाभवंतिदिवानिरेकोअथयामिनिषुते
गर्हिताःकर्मस्कशोभनेषुइतिइतिवारप्रवृत्तिहोरार्द्धयामकुलिकाःयदुक्तंश्रीपतिनायस्यग्रहस्यवारेपियत्क
र्मपरिकीर्तितम् तत्तस्यकालहोरायांसर्वमेवविधीयते इति आवश्यकृत्येश्रीपतिवचने ॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुक्लेइति शुक्लपक्षेब्धीशामिते चतुरेकादशामितेतिथौ चतुर्थ्येकादश्योः परतः पश्चिमार्द्धेविष्टिः अष्टमी राकयोस्तत्रैवशुक्लप्राग्दलेविष्टिः कृष्णदलेकृष्णपक्षेत्रिदिक्षुतृतीयादशम्योः पाश्चिमार्द्धेविष्टिः सप्तमी भूतयोः परतः कृष्णेप्राग्दलेविष्टिः तस्याः विष्टेः वक्रम् शरदोर्नगांबुधिवसुत्रयगैकयामादितः पंचघटि कात्मकंवल्कंभवति अत्रमानक्रमेणविष्टयोग्राह्याः चतुर्थ्यष्टम्येकादशीपौर्णमासीतृतीयासप्तमीचतु

शुक्लेब्धीशामितेतिथौपरदलेप्रागष्टमीराकयोर्विष्टिः कृष्णदलेत्रिदिक्षुपरतः प्राक्सप्तमीभूतयोः ॥

र्दशीषु चतुर्थ्यांपंचमप्रहरेमुखम् अष्टम्यांद्वितीययामादौ एकादश्यांसप्तमयामादौ पूर्णिमायांचतुर्थ यामादौ कृष्ण तृतीयायां अष्टमयामादौ सप्तम्यांतृतीययामादौ दश्यम्यांषष्ठयामादौ चतुर्दश्यांप्रथ मयामादौ पंचघट्यात्मकं विष्टेर्मुखंभवति तत्पुच्छं तत्कदाभवेत् चतुर्थीतः क्रमेणइभेंदुषड्गुणनग द्वीषुब्धियामात्यये चतुर्थ्यष्टमयामांतेघाटिकात्मकंविष्टेः पुच्छं अष्टम्यांप्रथमयामांते एकादश्यांषष्ठ यामांते पौर्णमास्यां तृतीययामांते सप्तम्यांसप्तमयामांते दशम्यांद्वितीययामांते ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विष्टेःपुच्छंचतुर्दश्यांचतुर्थयामांतेविष्टेः पुच्छंतथाचोक्तंदशम्यामष्टम्यांप्रथमघाटिकापंचकपरंहरिद्यः सप्त
म्योस्त्रिदशघटिकांतात्रिघटिकंतृतीयाराकायांकुयमघटिकाभ्यःपरतरंधृवंविष्टेःपुच्छंशिवातिथिचतुर्थ्योस्तु
विगमे १ विष्टेरब्रमालायामपिमुखमेवयामादौकथितमस्तितदंगमपिनाड्यस्क्पंचवदंनंगलकस्तथैकावक्षे
दशैकसहिताघाटिकाश्चतस्रः नाभिःकटीषडथपुच्छलतात्रतिस्रोविष्टेर्बुधैर्निगादितोंऽगाविभागएषः १उ

तद्वत्क्रंशरदोर्नगांबुधिवसुत्र्यंगैकयामादितः पुच्छंशस्तमिभेंदुषड्गुणनगद्वी
ष्वब्धियामात्यये ८ ॥

क्तंचमुखेकार्यध्वस्तिर्भवति भरणंचापिगलके धनेहानिर्वक्षः स्थलकटितटेबुद्धिविलयः कालिर्ना
भीदेशे विजयमथपुच्छेनिगदितंशरीरेभद्रायाःपृथगितिफलंपूर्वमुनिभिः१ अथविष्टेःस्वरुपमाह दैत्यै
द्रैःसमरेसुरेषुविजितेष्वीशः क्रुधाद्रष्टवान्स्वं कार्यकलिनिर्गताखरमुखीलांगूलिनीचात्रिपात् विष्टिःस
प्तभुजामृगेंद्रगलकाक्षामोदरीप्रेतगादैत्यघ्नीमुदितै : सुरैस्तुकरणप्रांतेनियुक्तासदाइतिविष्टिः ८ श्री
कृष्णाभ्यांनमः छ छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रौद्रेति एतेदिनेतिथिलवाःमुहूर्ताभवंतिदिनमानस्यपंचदशोधिभागःमुहूर्तोज्ञेयःसमुहूर्तःक्रमेणरुद्रादीनां पंचदशदेवतानांवातत्तन्नामकनक्षत्रसंबंधीभवति तेकेरुद्राशीविषइत्यादयःसर्वदाप्रथममुहूर्तःरुद्रस्यभवति आर्द्रासंबंधीत्यर्थःद्वितीय आशीविषाणांसर्पाणांआश्लेषासंबंधीभवति तृतीयःमित्रंअनुराधासंबंधीभवति चतुर्थः पितृदैवतः पितृमघासंबंधीभवति पंचमोवस्तुदैवतोधनिष्ठासंबंधीभवतिषष्ठोवार्दैवतः

रुद्राशीविषमित्रपितृवसुवार्विश्वेभिजित्केंद्रपाः शक्राग्नीनिर्ऋतिर्दिनेतिथिलवाः पाश्यर्यमाख्योभगः

पूर्वाषाढासंबंधीभवति सप्तमोविश्वदैवत उत्तराषाढासंबंधीभवति अष्टमोभिजिन्मुहूर्तःनवमःकभदैवतोरोहिणीसंबंधीभवति दशमःइंद्रदैवतोज्येष्ठासंबंधीभवति एकादशःशक्राग्निदैवतोविशाखासंबंधीभवति द्वादशोनैर्ऋतिदैवतोमूलसंबंधीभवति त्रयोदशः पाशिदैवतोवरुणदैवतःशततारकासंबंधीभवति चतुर्दशोयमदैवतोउत्तराफल्गुनीसंबंधीभवति पंचदशोभगदैवतःपूर्वाफल्गुनीसंबंधीभवति एतेदिनेमुहूर्ताः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवंतिरात्रौशंभुरार्द्रा अजांघ्रितः पूर्वाभाद्रपदातस्त्रयं पूर्वाभाद्रपदाउत्तराभाद्रपदारेवती दास्त्राद्विरौद्राआ
र्द्रारहिताःसप्तआश्विनीभरणीकृत्तिकारोहिणीमृगशिरःपुनर्वशुः पुष्पःहरिः श्रवणःसूर्योहस्तः त्वाष्ट्रचित्रा
समीरणोवायुदैवतः स्वातीएतेमुहूर्ताः निजभजेस्वनक्षत्रभवेकार्येसिद्धिदाःस्मृता आवश्यकंकार्ययन्न

रात्रौशंभुरजांघ्रित स्त्रयमगादास्त्राद्विरौद्राहरिः
सूर्यस्त्वाष्ट्रसमीरणानिजभजेकार्येस्मृताःसिद्धिदाः ॥ ९ ॥

क्षत्रेकथितंवर्ततेतस्यमुहूर्तेकर्तव्यं इतिदिनरात्रिभवास्त्रिंशन्मुहूर्ताः तदुक्तंरत्नमालायांयस्मिन्धिष्ण्येयच्च
कर्मोपदिष्टं तद्दैवत्येतन्मुहूर्तेपिकार्यमितिलोकेहिस्वामिसदृष्टंसेवके प्रयुज्यमानंदृश्यते अतोदेवतासदृष्टंत
न्नक्षत्रेकार्यमितितिथ्यादिषूपचर्यते तथाचदृष्टयोगदर्शनं ॥ ९ ॥ छ छ छ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लग्नाढ्येतिमासादितोयास्तिथयःगताःतिथयोलग्नाढ्याःकार्याः आरंभकालीनलग्नांकेनयुताः नवत्दृताः नवभिर्त्दृतेभक्तेख ० त्रि ३ इषु ५ अगे ७ शेषकेपंचकंभवतिएककेशेषेमृतिर्भवतिमृत्युपंचकंभवेत् अथद्वयोः शेषयोः सतोः हौताशनंवन्हिपंचकंभवेत् तुर्येचतुष्के शेषकेराजपंचकंभवतिअंगकेषट् शेषेत्दृति

लग्नाढयास्तिथयोगतानवत्दृताः खत्रीष्वगेशेषकेनस्यात्पंचकमेककेमृतिरथो
हौताशनंस्याद्दयोः तुर्येराजकमंगकेत्दृतिरथोष्टाभीरुगाख्यंत्यजेदुद्वाहेसदने
षुसेवनविधौमार्गेव्रतेषुक्रमात् ॥ १० ॥

श्चोरपंचकंभवेत् अथाष्टाभिः शेषैरुगाख्यंभवेत् रोगपंचकंभवति एतानिक्रमात् उद्वाहेविवाहेमृति पंचकं सदनेषुहुताशनपंचकं सेवाविधौराजपंचकम् मार्गेत्दृतिपंचकंत्याज्यं व्रतेषुव्रतबंधादिषुरुगाख्यंरोगपंचकंत्यजेत् उक्तंच व्रतेरोगंपथे चौरंसेवायांराजपंचकं गृहेचाग्निंपरित्यज्यविवाहेमृत्युपंचकम् १ इतिबाणपंचकम् ॥ १० ॥ ॥ ॥ ॥ ॥ ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंशूव्योति येषुयोगेषु पुरा प्रथमाः एताः नाडीः त्यजेत् केषुकाः गंगंडः शुशुलः व्याव्याघातःअति अतिगंडः विविष्कंभः ववज्रयोगः एषुपुरापूर्वाः षट्शरनव अंगात्रित्रिनाडीः त्यजेत् शुभेशुभकार्येस र्वौचतौ अंतव्यतीपातकौत्यजेत् वैधृतिव्यतिपातौसर्वावपिपूर्वपरिघार्धपरिघस्यपूर्वार्धइत्यर्थः एषु प्रागुक्तयोगेषु गंशुव्यतिविववैव्यपरिघेषुसत्सुइनभात्सूर्यभात् विध्यृक्षयुक्तेअभिजित् सहितेगणि-

गंसूव्यातिविवेषुषट्शरनवांगत्रित्रिनाडीः पुरासर्वांत्यव्यतिपातकौचपरिघा र्धपूर्वमुइझच्छुभे योगेष्वेष्विनभाद्विधुर्विषमभेविध्यृक्षयुक्तेर्गलास्याच्चंडीश्वर शस्त्रपातइहसागंशूव्यवैहांतभे ॥ ११ ॥

तेसातिविषमभेयदाविधुर्भवति तदार्गलाएकार्गलयोगोभवति इहचंडीश्वरशस्त्रपातः स्यात्इहक्क सासाध्यः गंगंडः भूभूलः व्यव्यतीपातः वैवैधृतिःहर्षणः एषांयोगानांअंतेयद्भंतत्रतथाचोक्तंसाध्यह र्षणशुलानांवैधृतिव्यतिपातयोः यभ्दंगंडस्यचांतेस्यात्तत्पातेननिपातितं एवमेवैकार्गलहरायुधयोगौ कथितौ इत्येकार्गलचंडायुधौ ॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनकृद्भौमार्क्यगूनांरविभौमशनिराहूणांपुरःपुरस्तात्एतेषुभेषुनक्षत्रेषुलत्तास्यात्एतेषुकेषुअर्कभीभनखे
षुअर्काद्द्वादशत्रीणिइभाअष्टौनखाविंशतिस्तेषुअत्राशुभानांलत्ताकथितायतः उडुनिनिर्दलितेशुभलत
यानफलमस्तिबलस्यत्तयाअशुभलत्तितमत्तितदूढयोर्द्धनसुतानसुतायकरंपरं १ चपरंतिर्यगूर्ध्वगतिकाःस
प्तरेखाःलिखेत्अत्रैकरेखागतयोर्ग्रहयोःसतोर्वेधोभवति सवेधोव्रतबंधदेवप्रतिष्ठाचौलादिषुत्याज्यःअथो

**अर्कत्रीभनखेषुभेषुदिनकृद्भौमर्क्यगूनापुरोलत्तासप्तचातिर्यगूर्ध्वगतिकारखालि
खेदग्निभात्वेधोत्रैकगयोरथोद्वहविधौपंचोर्ध्वातिर्यग्गताद्वेद्वेकोणगतोत्रिविध्य
तिखगःकोणद्विरेरेवाग्निभात् ॥** द्वहविधौविवाहेपंचपंचऊर्ध्वतिर्यग्गतारेखालिखेत्द्वेद्वेरेखेकोण
गतेलेख्येअत्रापिखगोग्रहःकोणस्यईशकोणस्याद्विमतायारेखायाः तत्राग्निभात्स्थितोविध्यतितत्रसर्वेषा
मेववेधस्त्याज्यःतत्ररोहिण्यांकथंवेधः स्यात्अभिजितिग्रहेस्थितेरोहिणीवित्धाभवतिअभिजित्कथंभव
तिवैश्वदेवतःचतुर्लवःश्रवणस्यपंचभृ १ ५लवःइहअभिजितामितिःउत्तराषाढायाः प्रांत्योंघ्रिः श्रवणस्यपं
चदशोविभागःएतदभिजिद्भंभवतितत्रस्थखेटेरोहिणीनांवेधोभवतिइत्तिलत्तापंचशलाकावेधविचारः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वकीयजन्मभात्जन्मनक्षत्रात्दिनभोन्मितिः दिननक्षत्रस्यसंख्याकार्यासानवद्दतानवभिर्द्दताकार्याशे
षाशेषमितातारा भवति तत्रनवताराःशेषाः कस्माद्भवंतिशुन्यशेषमितःनवसुत्रिबाणाद्रयस्तृतीयापंचमी
सप्तम्योनेष्टाशुभानतथाचोक्तं जन्मसंपद्विपत्क्षेमाः प्रत्यरिःसाधकोवधःमैत्रातिमैत्रातारास्युस्त्रिष्ववृत्या
नवैवहि १ तद्बलतोविधुःताराबलाद्विधुःफलदोभवतियादृशीयद्दिनेताराभवतितद्दिनेचंद्रस्तादृशंफलंद

जन्मर्क्षाद्दिनभोन्मितिर्नवद्दतास्तारास्त्रिबाणाद्रयोनेष्टास्तद्बलतोर्विधुविधुबला
दर्कोर्कवीर्याच्परेज्ञेयाः संक्रमणेफलायतुगमेसूर्यर्क्षतश्चंद्रभंभक्तागौस्त्रिरसेभ्रमों
ऽबरयमेशेषेशुभश्चाडलः ॥ १३ ॥ दातिविधुबलादर्कःयादृशेचंद्रेसूर्यःसंक्रमणंकरोतितादृ
शंफलंसूर्योददातिअर्कवीर्यात्सूर्यबलात्परेभौमादयः षट्संक्रमेणेराशिसंक्रमेणफलदाज्ञेयाःयादृशेसूर्ये
भौमबुधगुरुशुक्रशनिराहवोराशिसंक्रमणंकुर्वंतितादृशंसग्रहःफलंददातितुपुनःगमेगमनेसूर्यर्क्षतःसूर्यभा
त्चंद्रभंयावत्तमंभवतितदंगैःसप्तभिःभक्ताशेषंकार्यंत्रिरसेत्रिरसमितेशेषेभ्रमःभ्रमणंयोगोभवतिअंबस्यमे
शुन्याद्विशेषेअडलोयोगोभवतिभ्रमोप्यशुभअडलोप्यशुभः ॥ १३ ॥ इतित्याज्यप्रकरणं ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेवत्यांस्थिराणिरोहिण्युत्तरभानिमैत्रमनुराधामुलंमृगभंएषांसमाहारःतस्मिन्स्वातौमघायांकरेहस्तेपुनःक
सौम्येर्केसौम्यायनगतेरवौकिंलक्षणेसौम्यायनेशफरोझिंतेशफरोमीनस्तदुझिंतेऽर्केणरहितेगोधुलिकंल
ग्नंकुर्यात्किंकृत्वातनुषडष्टेंदुंत्यवक्त्वातनौषष्ठेऽष्टमेचंद्रंत्यवक्त्वाखैलः सूर्यभौमशनिराहुभिर्युक्युक्तंहतं
त्तिलतंविद्धंपंचशलाकचक्रेविद्धंभंनक्षत्रंत्यक्त्वात्यक्तकुलिकोमनुक्रमसमइत्यादि अर्गलाएकार्गलयोगः
योगेष्वेष्विनभादित्यादिअपमतुलांक्रांतिसाम्यंत्यक्त्वाक्रांतिसांम्यंतुब्रम्हतुल्येपाता धिकारेसमायातिअ
रेवत्यांस्थिरमत्रैमूलमृगभेस्वातौमघायांकरेसौम्येऽर्केशफरोझिंतेतनुषडष्टेंदुख
लैर्युग्घतं ॥ न्यश्वशुक्लेखाब्धि४०घटीष्वस्तिपातोधुवस्यादिक्ष्व१०पिप्रत्यब्दंगो९पलैर्हीनःखाद्रिति
थ्युन्मिताच्छकात् १५७० कुहुममास्यांरिक्तांअमासांनिध्यात्कृष्णांचतुर्दशींपक्षातिंप्रनिपदंतदुक्तंअमा
तिथिः पार्श्वातिथिद्वयेनसमंनमांगल्यमुपादधातीतिविष्टिभद्रांत्यत्त्कायामदलंतुर्याद्रिद्विशराष्ट्रमरसकमि
त्यादियाम दलंत्यक्त्वेत्यर्थः कुयोगोमृत्युयमघंटादिःकुदिनमवमंतमपित्यत्त्काविवाहोभवतिपुन क्कश
फरोझिंतेमीनसंक्रांतिरहितेसौम्येर्केउत्तरायणगेसूर्ये अत्रोत्तरायणग्रहणं सौरमासादरार्थं तथाचोक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खेरमीनामकरादिषड्गृहीकरग्रहेमंगलकन्मृगीदृशामितिकेशवार्कः तथापिसौम्यायनवशात्पौषचैत्रयोः शुक्लपक्षेनविवाहः तथाचोक्तं विवाहप्रकाशेपौषेमृगगेसूर्येपरपक्षेचैत्रमास्यजर्क्षेऽर्केउद्वाहः कर्त्तव्योन्यथाभवेत्तावनिष्टफलौ १ तत्रैवकार्तिकोमासेशुद्धिंगुरोर्विलोक्यरवेश्चंद्रबलं अक्रूरयुतेधिष्ण्येदेवोत्थानविवाहेस्यात् २ अत्रग्रंथांतरेवक्ष्यमाणश्लोकेचापार्कमीनार्कयाम्यायनसिंहस्थगुरुभृगुजीवयोरस्तबाल्यवृद्धत्वातिचारवक्रसमयेपरंसत्कार्यंनस्यादितिवक्ष्यतितस्मादत्रविवाहादौगुरुशुक्रयोः शिशुत्वजरत्वेत्याज्ये

विद्धंभंकुलिकार्गलांपमतुलांरिक्तांकुहूंपक्षातिंविष्टियामदलंकुयोगकुदिनंत्यक्त्वा विवाहःशुभः१४॥तद्यथाशिशुजरत्वमाहशिशुजरत्वमहान्युदयोऽस्तयोदर्शचतुर्दशचांगिरसःस्फुटम्उशनसोदशपंचचपश्चिमेगतिवशात्त्रिदशाहमपश्चिमे १ अष्टाविंशतिवासरान्सुरगुरोर्वक्रातिचारेत्यजेत्सिंहेपंचनवांशकान्मृगगतेपंचैवनीचांशकान्बालेवृद्धदशांगतेऽथनियतंलुप्ताख्यसंवत्सरंसर्वंचास्तमितेसभीतिरहितःप्रोक्तंहिगर्गेणच २ अष्टमेद्वादशेवर्षेमासत्रयगतेसति विवाहेतत्रकुर्वीतगर्भमासविमिश्रणात् १ इत्यादिसर्वंविचार्यलग्नंकर्तव्यम् १४श्रीसीतारामचंद्रःप्रसन्नोस्तु श्रीसांबसदाशिवोजयति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथघटिकालग्नमाहलग्नइतिपूर्वश्लोकेएषुयोगेषुविवाहः शुभइत्युक्तमस्तितत्रलग्नशुद्धिमाहलग्नेमानवरा
शिगेमनुष्यराशिलग्नेमनुष्यराशयइतितुलामिथुनप्रमदाधनुःप्रथमखंडमखंडफलंजगुःवामनवराशिगेनव
लवेनवांशेलग्नस्यत्रिंशदंशाःतेषांनवांशाःअंश ३ कला २० एवंराशौनवनवांशाभवंतितेषांनवांशानांगणना
चतुर्भ्योराशिभ्योभवातितद्यथामेषात्मेषाश्वसिंहानांनक्राद्वृषमृगस्त्रियः घटात्कुंभात्रिजूकानांकर्कान्मीना

**लग्नेमानवराशिगेनवलवेमंदाच्चतुर्वर्जितेषष्ठेलग्नपचंद्रशुक्ररहितेरंध्रेविधोःपंच
भिःहीनेथेंदुगुरुसमौमदगतौपापोत्थकर्तर्यपित्याज्यालग्नशशांकयोस्तनुलवौ
तन्नाथदृष्टौशुभौ ॥ १५ ॥**

लिकर्किणाम् १ अने नक्रमेणमानवराशिलवे
मिथुनकन्यातुलाधनुषामन्यतमस्यनवांशेलग्नगेकिंभूतेलग्ने अर्केःशनेःसकाशात्चुतुर्ग्रहवर्जितेशनिरावि
चंद्रभौमवर्जितेषष्ठेभवनेचंद्रलग्नपति शुक्ररहितेषष्ठेलग्नपोभंगदःचंद्रशुक्रोचअष्टमेविधो सकाशात्पं
चभिर्हीनेचंद्रमंगलबुधगुरुशुक्रवर्ज्याइत्यर्थःअथेंदुगुरुचंद्रजीवौ तत्रलग्नेमदगतौसप्तमगतौसमौनानिषि
द्धौनश्रेष्ठौअन्यसप्तग्रहाजामित्रेभंगदाःतथाचोक्तंत्रिविक्रमाचार्येःत्याज्यालग्नेऽब्धयोमंदात्षष्ठेशुक्रेंदुल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रपाःरंध्रेचंद्रोदयःपंचसप्तमेऽब्जगुरूसमौअथलग्नशशांकयोः पापोत्थकर्त्तरीत्याज्यालग्नंपापद्वयमध्येभव
तिचंद्रोवापापद्वयमध्येभवति एतद्वयंत्याज्यंतदुक्तंखलकृतातनुरोहिणिनाथयोर्हरधराविधुरांकुरुतेवधूंतनु
लवौलग्ननवांशौतन्नाथदृष्टौशुभौ १५ इतिविवाहमुहूर्ताःस्वाताविति एषुयोगेषुवध्वानवोढायाःगृहप्रवेशः
शुभोभवतिकस्वातौमूललघुध्रुवेमूलंलघूनिचहस्तेज्याश्व्यभिजितानिध्रुवाणिचरोहिण्युत्तरात्रयं एवांस

**स्वातौमूललघुध्रुवेमृदुमघाकर्णेतथावासवेरिक्तांप्रोज्यचभद्रिकांरविबुधक्षोणीज
वारांस्तथा वध्वावेश्मनिवेशनंशुभकरंशुक्रंपुरोदक्षिणंत्यक्ताऽब्देविषमेद्विरागमवि
धिर्यात्रातिथौप्रोक्तभे ॥ १६ ॥** माहारस्तत्रमृदुमघाकर्णेमृदूनिमृगशिराश्चित्रांत्यमैत्राणिचमघा
चकर्णश्रवणश्चएषांसमाहारस्तत्रतथावासवेधनिष्ठायांतत्रत्याज्यमाहरिक्तांचभद्रिकांचभद्रा तिथितथार
विबुधभौमवारान्प्रोज्यत्यवत्वाअथाद्विरागमनमुहूर्तमाहअब्देविषमेतृतीयेपंचमेशुक्रंपुरो दक्षिणंत्यत्काद्वि
रागमाविधिःप्रोक्तःयात्रातिथौरिक्तावर्जिततिथौप्रोक्तभगणेस्वातौमूलेत्यादिनोक्तेअत्रदेशाचाराद्वीपोत्स
वेद्विरागमंकुर्वंतितत्रपठंतिनशुक्रदोषोनचजीवदोषस्ताराबलंचंद्रबलंनयोज्यंद्विरागमादौनवकन्यकाया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दीपोत्सवेमंगलमामनंति १६ इतिवधूप्रवेशाद्विरागमौमासाइतिएतेपदार्थाःनवोढायाःप्रथमार्त्तवेप्रथमर
जोदर्शनेशुभदानभवंतिएतेकेभाद्रमधूर्जपौषशुचयोमासाः मधुःचैत्रःऊर्जः कार्तिकःशुचिराषाढःएतेपंच
मासाःनेष्टाःपर्वणीपौर्णमासीदर्शौअष्टमीद्वादशीरिक्ताकिलक्षणाःषष्ठिकन्विताःषष्ठीसहिताइत्यर्थः खल
दिनानिरविभौमशनिवारानेष्टाःउग्रर्क्षंपितृपूर्विकांतकंमिश्रेद्वीशानलेइंद्रभंज्येष्टासर्पःआश्लेषाआर्द्राचप

मासाभाद्रमधुर्जपौषशुचयःपर्वाष्टमीद्वादशीरिक्ताःषष्ठिकयान्विताःखलदिनान्युग्र
र्क्षमिश्रेंद्रभंसर्पार्द्राःप्रथमार्तवेनशुभदाःसंध्याचरिक्ताष्टमीतीक्ष्णाख्यंत्यमघानलं
कुदिवसंत्यक्त्वातदीयाप्लवः॥ १७॥ रंसंध्याएतेपदार्थाःप्रथमार्तवेनशुभदाभवंतिएतेष्वेवजा

यतेतदाकौशिकोक्ताशांतिर्लिखितास्तिसाकर्त्तव्यातदनंतरंतयाऋतुस्नानंकर्तव्यं तत्रशुद्धिमाहरिक्ताति
थिरष्टमीतीक्ष्णंज्येष्ठार्द्रोरगमूलंअश्विअश्विनीअंत्येरेवतीमघाकृत्तिकाकुदिवसंरविभौममंदवारंत्यक्त्वात
दीयस्तस्याअयंआप्लवःस्नानंऋतुमत्याःमलस्नानंशुभमिति ॥ १७ ॥ इतिप्रथमार्तवऋतुस्नाने.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यक्तेति आर्त्तवेऋतुकालेस्वीयांयोषितंस्वकीयप्रियतमांमुदाहर्षेणेयात्गच्छेत्कसमतयीषुसमरात्रिषु
ष्ठ्यष्टमीदशमीद्वादशीचतुर्दशीषुकिंकृत्वाप्रथमतः ऋतुकालात्चतस्रोरात्रीःत्यक्त्वाचमूलंमघांरेवतींत्य
क्त्वाश्राद्धस्यनैमित्तिकस्यपूर्वरात्रिंतथातदहोरात्रंचत्यक्त्वाकुहूंअमांचपरंपक्षार्धमष्टमीं चतुर्दशींचत्यक्त्वा
कसतिइंदौशुभेचंद्रबलेसतिशोभनौश्चंद्रबुधगुरुशुक्रैः कंटकलग्नतुर्यसप्तमदशमस्थैः कोणगैःनवपंचमगैः

त्यक्त्वामूलमाघांत्यमादिमनिशंश्राद्धस्यगस्त्रंकुहुंपक्षार्धंचचतुर्दशींप्रथमतोरात्री
श्चतस्त्रोमुदास्वीयांयोषितमार्तवेसमतमीष्विंदौशुभेशोभनौः खेटैःकंटककोण
गैस्त्र्यरिभवेपापैर्नृयोगेधियात् ॥ १८ ॥

सद्भिः त्र्यरिभवेतृतीयषष्ठैकादशस्थैः रविकुजमंदैःसद्भिः पुनः कृनृयोगेषुजताकोत्तनृयोगेषुआजर्क्षेपुरु
षांशकेषुबलिभिर्लग्नार्कगुर्विंदुभिः पुंजन्मप्रवदेत्समांशकयुतैर्युग्मेषुतैर्योषितः गुर्वर्कौविषमेनरंशशिसि
तौक्रश्चयुग्मेस्त्रियःइत्यादिभिर्योगैःसामान्येनभौमगुरुरविवारेमृगपुनर्वसुपुष्पमुलहस्तश्रवणानामेकतमे
नक्षत्रेविषमलग्नेगुरौत्रिकोणोदयस्थेऋतुमतींगच्छेदितितात्पर्यार्थः ॥ १८ ॥ इत्याधानाम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूलेतिएषुयोगेषुसीमंतकर्मसंस्कारःएषुकेषुअंगाष्टकेषष्ठेऽष्टमेमासिकुलाचराद्वा मूलंईज्यंपुष्यं आदित्यंपु
नर्वसूःविष्णुः श्रवणःसूर्यः हस्तंशशीमृगशिरः एषुनक्षत्रेषुत्रिपंचमितेमासेषुपुंसवनंरक्षाबंधनंकार्यं क्वसति
तदीशेदक्षेसति तस्यमासस्यतृतीयपंचमषष्ठाष्टममासानांईशेस्वामिनिदक्षेबलवत्तेरसतिमासेशास्तुजात
केप्रोक्ताःकललघनांकुरास्थिचर्मांगजंचेतनायाःसितकुजजीवसूर्यचंद्रार्किबुधाःपरतःउदयपंचद्रसुर्यना

मूलेज्यादितिविष्णुसूर्यशशिभेसीमंतमंगाष्टकेमासेपुंसवनंत्रिपंचकमितेदक्षेत
दीशेविधौसद्दृष्टेकुजजीवभानुदिवसेपुंभागलग्नेखलै :षष्ठत्र्यायगतैःशुभैःसुत
तपःकेंद्रेष्वरिफ्फाष्टगैः ॥ १९ ॥

थाःक्रमशोगदिताःशुभाशुभंचमासाधिपतेः सद्दशंएषामेकतमेबलिनिविधौचंद्रेसद्दृष्टेशुभद्दृष्टेकुजजीवभा
नूनामेकतमवारेपुंभालग्नेविषमलवेलग्नकेवाविषमलग्नेखलौःपापैःषष्ठतृतीयलाभगैःशुभैःशोभनैःसुत ५
तप९केंद्रंषु१।४।७।१०गतैः अरिफ्फाष्टगैःशुभैः रिफ्फंद्वादशंअष्टमंमृत्युभंतत्रगच्छंतितेरिफ्फाष्टगाःनरि
फ्फाष्टगैःपुंसवनसीमंतेस्तः १९ इतिपुंसवनसीमंते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अश्विनीतिगमोद्दहजनुः कालेषुगंडांतकंअसत्ततत्कियत्कभवतितदाहअश्विन्यंत्यभयोः अश्विनीरेव
त्योःप्राक्परघटीद्वंद्वंअश्विन्यांप्राक्घटीद्वंद्वंरेवत्यामंत्यंमघटीद्वयंएवंचतुर्घटिकात्मकंगंडांतकालोभवति
एवंमघयाः प्राक्घटीद्वयंउरगभमाश्लेषातस्याः प्रांत्यंघटीद्वयंगडांतकंभवतिमूलस्याद्यंघटीद्वयंइंद्रस्यज्ये
ष्ठायाःप्रांत्यंघटीद्वयंगंडांतंभवतिएवंचतुर्घटिकात्मकंगंडांतंभवतिअन्यग्रंथेगंडांतंत्रिविधमुक्तम्गंडांतांत्रि

अश्वन्यंत्यभयोर्मघोरगभयोर्मूलेंद्रयोः प्राक्परंनाडीद्वंद्वमसद्गमोद्दहजनुःकाले
षुगंडांतकंमैत्रांत्यनिलभध्रुवेंदुषुरवीज्यारेषुसूताप्लवः केंद्रेज्ञेज्यासितेमृदुध्रुवचर
क्षिप्रेषुनामेष्ठकम् ॥ २० ॥ विधंप्रोक्तंनक्ष तिथिराशिजंनवपंचचतुर्थ्यंतेद्वेकार्धघटिका
मितं १ अथसूतायाःप्लवः स्नानंततत्कमैत्रांत्यनिलभध्रुवेंदुषुमैत्रमनुराधाअंत्यंरेवतीअनिलंस्वातिःध्रुवाणि
रोहिण्युत्तराःइंदुःमृगशिरः एतेषुभेषुरवीज्यारेषुरवीगुरुमंगलवारेषुज्ञेज्यसितेबुधगुरुसुक्रेकेंद्रेसतिमृदुध्रुव
चरक्षिप्रेषुभेषुमृगशिरश्चि त्यमैत्ररोहिण्युत्तरास्वातिपुनरवसुश्रवणधनिष्ठाशतभिषक्हस्त पुष्याश्विन्य
भित्सुनामक्रमइष्टदंवांछितप्रदंभवति २० इतिगंडांतसूतिकास्नाननामकरणानि ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पौष्णेतिअस्मिन्योगेप्रेंखाधिरोहःशुभःपौष्णेज्याश्विकरद्वयध्रुवचरभेषुभौमशनिवर्जितेवारेदंत ३ २ अष्टाद
श १ ८ षोडश १ ६ अर्क १ २ दशमे १ ० दिनेतच्चक्रेतस्याःप्रेंखायाश्चक्रेसूर्यर्क्षात्प्रतिदिशंपंचपंचभानिनगाःम
ध्येदेयानिशीर्षेप्रदेशेपंचशुभाः ताराः भानिदक्षिणेपंचमृत्युदाःपश्चिमेपंचकार्श्यकृतःसौम्येपंचरुदनंकुर्वं
तिएताःचतुर्दिक्षुफलाःमध्यगाः नागाःइष्टदाःइतिप्रेंखारोहः २ १ निष्क्रामतियःप्रेंखाधिरूढःतस्यबहिर्नि

**पौष्णेज्याश्विकरद्वयध्रुवचरेष्वार्किहीनेदंताष्टादशषोडशार्कदशमेप्रेंखावरोहःशुभः
तच्चक्रेथचतुर्दिशंशरमितास्तारानगामध्यागाःसूर्यर्क्षाच्छुभमृत्युकार्श्यरुदनंदिक्ष्वि
ष्टगामध्यगाः २१ निष्क्रामस्त्रितुरीयमासिहरिभद्वंद्वेदितीज्येंदुभेमैत्राश्व्यंत्यकरेच
रोदयलवेभौमार्किरिक्तोज्झिते ॥** ष्क्रमणंभवतित्रितुरीयमासितृतीयेचतुर्थेमासिशिशोःनिष्क्रा
मः सूर्यावेक्षणंशुभंहरिभद्वंद्वेश्रवणद्वयेअदितिः पुनर्वसुः ईज्यंपुष्पंइंदुभेमृगशीर्षेमैत्रमनुराधाअश्विआश्वि
भंअंत्यंरेवतिकरहस्तेएषुभेषुचचरोदयलवेचरलग्नेमेषकर्कतुलामकराणामेकतमेलग्नेवातदंशेनवांशे किंल
क्षणेभौमार्किरिक्तोज्झितेमंगलशनिवाररिक्तातिथिवर्जितेनिष्क्रमणंकार्यमित्यर्थः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथचौलकर्माहचित्रापौष्णमृगेंद्रभेलघुचरेमुंडनंचौलंशुभंरिक्तातिथिःआरोभौमः सूर्यःप्रसिद्धःअर्कजो
मंदस्तान्वारान्षष्ठींपक्षनिप्रतिपदंपर्वपौर्णमासीदर्शौजन्मभदिनंजन्मनक्षत्रंजन्मदिनंचत्यक्त्वाचौलक
र्मकार्यमितिइतिनिष्क्रमणचौले२२ पौष्णोतिएषुयोगेषुअन्नाशनंबालानामन्नप्राशनंसत्पौष्णत्वाष्ट्रलघुध्रु
वादितिहरिद्वंद्वैंदवेरेवतिचित्रालघुभानिहस्तपूष्यश्विन्यभिजित्ध्रुवाणिरोहिण्युत्तराअदितिः पुनर्वसुःह

चित्रापौष्णमृगेंद्रभेलघुचरेरिक्तारसूर्यार्कजान्षष्ठीपक्षतिपर्वजन्मभदिनंत्यक्त्वा शु
भंमुंडनं२२पौष्णत्वाष्ट्रलघुध्रुवादितिहरिद्वंद्वैंदवेज्ञेगुरुशुक्रेदर्शमथाष्टमीहरिदिनंत्य
क्त्वाचनंदांजनेःलग्नर्क्षाष्टममुज्झ्यकेंद्रनवधीरंध्रांत्यसौम्येष्वषड्वर्जेदौरसमासिनुःश
रमितेस्त्रीणांसदन्नाशनं ॥२३॥रिद्वंद्वंश्रवणद्वयंऐंदवंमृगःएषांसमाहारःतस्मिन्ज्ञेबुधवारेगुरौजीवे
शुक्रेत्रिषुवारेषुदर्शअमावास्याअष्टमीहारिदिनंद्वादशीनंदांप्रतिपत्षष्ठेयेकादशीःत्यक्त्वाजनेःजन्मभदिनं
जन्मकालस्यलग्नंऋक्षंराशिस्ताभ्यामष्टमलग्नंउज्झ्यआसमंतादुज्झ्यकेंद्रनवधीरंध्रांत्यसौम्येसति प्रथमतुर्य
सप्तमदशमनवमपंचमाष्टमद्वादशभवनेषुसौम्यग्रहयोगेअष्टमषष्ठरहितेविधौषष्ठेऽष्ठमेमासिनुःपुरुषस्यस्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णांकन्यानांशरमितेपंचमेमाशिप्रथमान्नप्राशनंसदितिइत्यन्नप्राशन २ ३ अथक्षौरकर्मत्वाष्ट्राश्विपौष्णमृगपु
ष्यकरेंद्रभंचचौलंचेरषुचबुधेंदुकवीज्यवारे कुर्यात्क्षुरादिकशुभंप्रविहायरिक्तांपक्षांतपर्वदिनमेवनिशांच
संध्यां १ मैत्रौत्तराविधिभवन्हिभपितृभेषुबांणा ५ ब्धि ४ नाग ८ रसवन्हिमितांश्चधस्रान्क्षौरिनरोभवतिचेच्च
तुराननेनतुल्योनजीवतीभृशंशरदंबलाढ्यः २ भानुर्मासंक्षयपतितथासप्तमार्तसूनुर्भौमश्चाष्टौवितरितिशुभं
मैत्रेज्यर्क्षमृगेत्यभश्रुतिकरद्वंद्वेपृथक्सद्गृहैस्त्र्यायेंऽगेगुरुसंयुतेखलखगैर्हीने थसौ
म्येऽयनेओजेऽब्देमधुपौषजन्मभदिनंमासंचहित्वाश्रवोवेधःसन्नथदस्त्रपूषवसुभेभू
षाकरात्पंचके २४॥ बोधनःपंचमासान्सप्तैवेंदौदशसुरगुरौशुक्रएकादशेतिप्राहुर्गर्गप्रभृतिमुनयः क्षौ
रकायेषुनूनम् ३ त्वाष्ट्रंचित्राअश्विअश्विनीपौष्णंरेवतीमृगःमृगशिरः पुष्यंकरेहस्तेइंद्रः ज्येष्ठाचरेषुस्वातीपु
नर्वसुश्रवणधनिष्ठाशतभिषजःतेषुचंद्रबुधगुरुशुक्रवारेषुक्षौरंकार्यंकिंकृत्वामैत्रोनुराधाविधिभंरोहणीवन्हि
भंकृत्तिकापितृभंमघाएतेनेष्टाःतान्त्यक्त्वापक्षांतःप्रतिपत्पर्वआमावास्यापौर्णमास्यौचपंरीरक्तांविहाय
रविकुजमंदान्त्यक्त्वाक्षौरकार्यंमैत्रेतिअस्मिन्योगेश्रवोवेधःसन्कर्णवेधःशुभःकृमैत्रेज्यर्क्षमृगेअनुराधाषु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्यमृगशीर्षेअंत्यभश्रुतिकरहंद्वेपृथगितिरेवत्याःद्वयंश्रुतिद्वयंकरद्वयंद्ग्रहैः न्यायेतृतीयैकादशेसद्भिःअंगल
ग्नेगुरुसंयुतेखगैः पापग्रहैः हीनेलग्नेसौम्येयनेओजेऽब्देविषमवर्षेमधुश्चैत्रःपौषःजन्मभदिनमासंचएतानि
त्यक्त्वाकर्णवेधःशुभःअथकर्णवेधेभूषावधार्यातत्राहदस्रमश्विनीपूषभंरेवतीवशुभंधनिष्ठातत्रकराद्धस्तात्यं
चकेहस्तचित्रास्वातीविशाखाअनुराधासुभुषाकर्णवेधभूषावलायादिलोक प्रसिद्धचूडाइत्याविधार्यतत्र
त्री३षु५त्र्य३क्षि२नागा७क्षि२चंद्रगुण३भू १ धिष्ण्यानिसूर्यर्क्षतःसूर्यसृग्भृगुराहु
विच्छनिगुरुग्लौकेतुदेयानिचसौम्यर्क्षाणिशुभानिपाणिवलयेकर्णत्रयेश्वानिलेपि
त्र्येभाग्यमृगेशभेद्विदयितेसौष्विनेकामठं२५ चक्रंवर्ततेइतिकर्णवेधभूषे२ ४ त्रीधितिपाणिव
लयेशंखभूषणेसूर्यर्क्षतःसूर्यः सूर्यभात्त्रिपंचत्रिद्विसप्तद्व्येकत्र्येकधिष्ण्यानिसूर्यासृग्भृगुराहुविच्छनिगुरु
ग्लौकेतुदेयानिभवंतिप्रथमंसूर्यस्यत्रीणिअसृजोभौमस्यपंचभृगोस्त्रीणिराहोरक्षिद्वेविदोबुधस्यनगाः सप्त
शनेरक्षणिद्वेगुरोरेकंग्लवश्चंद्रस्यत्रीणिकेतोः भूरेकंएतानिधिष्ण्यानिवर्ततेतन्मध्येसौम्यर्क्षाणिचंद्रबुधजीव
शुक्रभानिभवंतिचपरंफर्णत्रयेश्रवणत्रयेअश्व्यारेव्येअश्विन्यांअनिलेखातौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पित्र्येमघायांभग्येपुर्वफाल्गुन्यांमृगेईशभेआद्रायांहिदयीतेविशाखायांसौम्येषुसौम्यवारेषुबुधगुरुशुक्रेषुइ
नेरविवारेकामठंकमठपृष्ठजवलयानिधार्याणिचूडाचक्रं२ ५हस्तादितिएषुयोगेषुमौंजीब्राह्मणानांमेखला
षंधःश्रेष्ठः क्कहस्तादित्रितयेअंत्यहरिअदितिद्वंद्वेपृथक्पुनर्वसुपूष्येरेवत्यश्विन्योः श्रवणधनिष्ठेतत्रचंद्रभेमृ
गशीर्षेशुक्रेज्येंदुबलेगुरुशुक्रचंद्राणांगोचरबलेतपः पंचकेमघादिपंचमासेषुपुनःक्कधवलेपक्षेशुक्लपक्षेहिती

हस्तादित्रितयेंत्यहर्यदितिभेद्वंद्वेपृथक्चंद्रभेशक्रेज्येंदुबलेखलेंद्वितनुंषष्ठेंदुमं
त्यारिगंशुक्रंरंध्रखगान्विहायधवलेपक्षेद्वितीयाद्वयेपंचम्यांदशमी त्रयेशुभलवे
मौंजीतपःपंचके ॥ २६ ॥

याद्वयेद्वितीयातृतीययोः पंचम्यादशमीत्रयेदशम्येकादशीद्वादशीषुशुभलवेसौम्यलवेकिंकृत्वाषष्ठेंदुखलें
द्वितनुंखलैःरविभौमशनिराहुभिरिंदुनाचइतांप्राप्तांतनुंलग्नंविहायअंत्यांरिगंद्वादशरिपुभावेशुक्रंविहायरं
ध्रखगान्अष्टभावेसर्वेखगान्विहायमौंजीयज्ञोपवीतकर्मकार्याइतिमौंजी ॥ २६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूलेतिएषुयोगेषुशिशोर्बालस्यविद्योद्यमोविद्यारंभः शुभ :एषुकेषुमुलेऽश्वेअश्विन्यांमृगपंचकेमृगार्द्रापुन
र्वसुपुष्याश्लेषासुकराद्धस्ताच्चयेहस्त चित्रास्वातिषुकर्णे श्रवणेत्रिपूर्वासुतिसृषुपूर्वासुचएषुभेषुविच्छुक्रे
ज्यार्कदिनेषुबुधसुक्रगुरुरविवारेषुपंचमकेऽब्देकिंलक्षणेपुरादिनपूर्वेतिथियुतायेअनध्यायाः रिक्ताश्चतद्रहि
तेअष्टमीनवमीत्रयोदशीचतुर्दश्यमापूर्णिमाप्रतिपच्चतुर्थ्योनिषिद्धाः त्रयोदशीचतुष्कंचसप्तम्यादिदिनत्र

**मूलेऽश्वेमृगपंचकेत्रिषुशरात्कर्णेत्रिपूर्वासुविच्छुक्रेज्यार्कदिनेपुरादि नयुतानध्याय
रिक्तोज्झितेअब्देपंचमकेशिशोरतिशुभोविद्योद्यमो ऽथैंदवेहौताशेतिसृषूत्तरासुच
धनुर्विद्यानविद्याभवेत्२७पौष्णेऽश्वेकरपंचकेचवसुभेचैलंबुधादित्रयेपुंसांपुष्यपुनर्व
सुस्थिरयुतेस्याच्छोभनंसत्तिथौ** यंचतुर्थीचतथात्या

ज्याअष्टावेतेग्रलग्रहाः १ अथऐंदवेमृगेहौताशेकृत्तिकायांत्तिसृषुउत्तरासुधनुर्विद्याश्रेष्टाभवेत्इतिवि
द्यारंभः॥ २७॥ पौष्णेइतिएषुयोगेषुचैलंवस्त्रधारणंशोभनंपौष्णेरेवत्यांअश्वेअश्विन्यांकरपंचकेहस्तादि
पंचकेहस्तचित्रास्वातीविशारवानुराधाःचपरंवसुभेधनिष्ठायांबुधादित्रयेबुधगुरुभृगुवारेरिक्तावर्जितातिथौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थौपुंसांपुरुषाणांपुष्यपुनर्वसुस्थिरयुतेरोहिण्युत्तरात्रयेवस्त्रधारणंसत्तच्चकेतद्वस्त्रस्यचकेनवधानवभिर्भोगे
कृतेकोणेषुचतुष्कोणेषुमध्यत्रिकोष्ठेषुदशापाशेकोष्ठद्वयेसुरासुरनरावसंतिचतुष्कोणेसुरावसंतिमध्यकोष्ठ
त्रयेअसुरावसंतिदशापाशेप्रांतेशेषविभागेकोष्ठेनरावसंतितत्रपंकांजनादिकंपंकस्यवांजनस्यप्रथमंधारणा
त्अंकादिकंचिन्हादिकंभवतिआदिशब्देनदग्धेफाटितेशुभंनेष्टशोभनफलंज्ञेयंदेवांशेशुभंरक्षोंशे नेष्टंमनु

तच्चकेनवधासुरासुरनराःकोणेषुमध्येदशाः पाशेस्युःशुभनेष्ठशोभनफलंपंकांज
नांकादिकं २८ उद्वाहेवसुभागधेयकरणेऽग्न्याधानमिंद्राग्निभेशक्राग्नेयमृगध्रुवां
त्यगुरुभेलग्नेजलर्क्षोज्झिते ष्यांशेशोभनफं

अत्रस्त्रीणांवस्त्रसाहचर्यात्भूषणाद्यपिधारयेत्तथाचोक्तं करादिपंचकेश्विभेसपौष्णवासवे स्मृताधृतिश्च
शंखकांचनप्रवालरक्तावाससां १ सज्जनवल्लभानासत्यपौष्णवसुभेकरपंचकेषुमार्तंडभौमगुरुदानवमंत्रि
वारैःमुक्तासुवर्णमणिविद्रुमशंखदंतरक्तांबराणिविधृतानिभवंतिसिद्ध्यै १ इतिवस्त्रं २८ उद्वाहइतिउद्वाहे
विवाहकालेवसुभागेधयकरेणपि वसुधनंतस्यविभागकरणकालेपिअग्न्याधानंकर्तव्यंकइंद्राग्निभेविशा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खायांशाक्रंज्येष्ठाआग्नेयंकृतिकामृगःध्रुवाणिरोहिण्युत्तरात्रयंअंत्यंरेवतीगुरुभेपुष्येलग्नेजलर्क्षोंश्लिष्टेमीन
कर्कमकरेभ्योऽन्यलग्नेचंद्रेजलराशिरहितेकोणंत्रिकोणं ५।९ चतुष्टयानि १।४।७।१० कंटककेंद्रचतुष्टयसं
ज्ञाःसप्तमलग्नचतुर्थखभानांउपचयानिषष्ठलाभतृतीयभानिएतेषुअर्कारजीवेंदुभिःसद्भिः शेषैःशेषग्रहैःबु
धशुक्रशनिभिःउपचयस्थितैःसर्वैःअमृतिगैःअष्टमभावरहितैःअग्न्याधानंशुभाह्यैभवंत्इत्यग्न्यधानं॥ २९

चंद्रेकोणचतुष्टयोपचयगैरर्कारजीवेंदुभिःशेषैश्चोपचयस्थितैस्मृतिगैःखेटैःशुभा
ह्यैभवेत् २९ ज्येष्ठायांहरिभेमृदुध्रुवलघुष्वोजस्विभिः पाकपः क्ष्माजार्कोदयज
न्मपैः स्थिरतनौशीर्षोदयेसद्युते. ज्येष्ठायामिति एषु

योगेषुभूपाभिषेकः क्वज्येष्ठायांहरिभेश्रवणेमृदूनिमृगचित्रारेवतीमैत्राणिध्रुवाणिरोहिण्युत्तरर्क्षाणिलघू
निहस्तपुष्याश्विन्यभिजित् तेषुपाकपःतत्कालिकदशानाथः क्ष्माजोभौमः अर्कोरविःउदयजन्मपैरिति
जन्मलग्नेशोजन्मराशीशः एभिःसर्वैःओजस्विभिः बलिष्ठैः शुभस्थानस्थैर्वास्वोच्चसुहृत्स्वत्रिकोणस्व
नवांशस्थैः वातेजस्विभिः उदितैः स्थिरतनौस्थिरलग्नेवृषसिंहकुंभानामेकतमेवाशीर्षोदयेलग्ने युग्मस्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिंहकुंभालितुलाशीर्षोदयःस्मृताःएतेषामेकतमेलग्नेसद्युतेशुभग्रहयुतेअत्रसाहिनेइतिपाठेसोमबुधगुरुभृ
गुवारेषुपरंरत्नमालायांशानिवारोप्युक्तोस्तितेनभोमार्कवारौनिषिद्धौअन्येवाराः शुभाःरिक्तांप्रोज्झ्यजनुर्ग्र
हाज्जन्मलग्नात्वाजन्मराशेरूपचये ३।६।१०।११।लग्नेत्रिषष्ठायगैःपापग्रहैःअंत्यषडष्टवर्जितशुभैः शु
भग्रहैःद्वादशषष्ठाष्टमरहितैःभूपस्याभिषेकः शुभइतितात्पर्यार्थःइतिराजाभिषेकः३०ध्यादित्येइतिभुपा

**रिक्तांप्रोज्झ्यजनुर्ग्रहादुपचयेलग्नेत्रिषष्ठायगैः पापैरंत्यषडष्टवर्जितशुभैर्भूपाभिषे
कःशुभः ३० ध्यादित्येध्रुवभेंत्यभेद्विदयितेत्वाष्ट्रद्वयेःवारुणेमैत्राश्वेरविजीवभार्ग
वदिनेचंद्रेशुभैर्वीक्षितेकुंतासिच्छुरिकाधनुः शरतनुत्राणानिकंटारिकाभुपालैरिति
हेतयोर्विधुबलेधार्याजयाप्तीच्छुभिः ॥३१॥** :लैःराजाभिःइतिएतावन्मात्राहेतयःआयु
धानिएषुयोगेषुधार्याःकिंलक्षणैःभूपालैःजयाप्तीच्छुभिःजयकांक्षिभिः ध्यादित्येपुनर्वसुद्वयेध्रुवेषुअंत्येरेव
त्यांद्विदयितेविशाखायांत्वाष्ट्रद्वयेचित्रद्वयेवारुणेशतभिषेमैत्राश्वेअनुराधाश्विन्यौएषुभेषुरवि जीवभार्गव
दिनेवारेषुचंद्रेशुभैर्वीक्षितेचंद्रेशुभेशुभग्रहैर्वाईक्षितेविधुबलेचंद्रबलेसतिकुंतःभल्लःअसिः खड्गःछुरिकाध

